स्वरावधानलक्षणम्

१ परिभाषा

शङ्खं चक्रं पुस्तकं ज्ञानमुद्रां पाण्यं भोजैर्धारयन्तं हयास्यम्
नत्वा श्रीशं पुण्डरीकासनस्थं वक्ष्ये हस्तस्वरविन्यासरीतिम्
१
पदक्रमजटाघनध्वजरथादिभेदैर्युता श्रुतिः
प्रथितलक्षणस्फुरितपञ्चवर्णक्रमा
यदीय वदनान्तरे वसति मापशास्त्रैस्समं समे विजयते तरां
प्रथितरामनामा गुरुः २
तनयो विनयो ज्वलश्च तस्य प्रथितो वैदिकवावदूकसिह्मः
महतां कृपयैर्वचक्रनामा स्फुटहस्तस्वरलक्षणं तनोति ३
विलक्षणाविस्मयमावहन्ती स्वरावधानामृतनामधेया
कृतिर्मदीया हृदयं गमेयं सतां प्रमोदं वितनो तु कामम् ४
अथ स्वरन्यासे कर्त्तव्ये किं दक्षिणहस्तेन वा वामहस्तेन वा
उत उभाभ्यां वा कीदृग्विधा कारेण हस्तेन स्वरविन्यासः
कर्त्तव्य इत्यत्राह
य स्वरन्यासकृद्विद्वान्थ्स आसीनस्त्वन्द्रितः
कृत्वा गोकर्णवद्धस्तं दक्षिणं दक्षजानुनि ५
क्रमात्स्वरेषु हस्ते च मनो दृष्टिं निवेश्य च
यथा शास्त्रं स्वरन्यासमङ्गुष्ठाग्रेण विन्यसेत् ६
तत्र स्वरविन्यासकरणे सत्याचार्यादयो यद्यागतास्तत्र किं
कर्त्तव्यमित्यत्राह
तदा यद्यागतः पूज्यो गुरुर्वा देवतापि वा
प्रणम्याथ न्यसेत्तिष्ठन् कृत्वा नाभिसमं करम् ७
यदि तैरभ्यनुज्ञातस्सो भ्यासकरणे सति
आसीन एव कुर्वीत स्वरन्यासं यथाविधि ८
इदानीं हस्तस्वरन्यासप्रकारं दर्शयति

उदात्तं निर्दिशेन्न्यासे तर्जनीं मध्यपर्वणि
नीचं कनिष्ठिकादौ च मध्यमा मध्यमे धृतम् ९
स्वारं चानामिकान्त्ये तु सर्वत्रैवं विनिर्दिशेत्
य स्वरस्यात्पृथक् भक्ते स्वरेरवास्थानमाप्नुयात् १०
यत्रोदात्त इवस्वार स्यात्तदूर्ध्वस्थितश्च यः
क्रमादनामिकायास्तौ विन्यसेन्मध्यमान्त्ययोः ११
आद्यन्त्यांशौ स्वारकम्पे यौ स्यातां स्वारनीचकौ
अनामिकान्त्यादिमयोस्तौ न्यसेद्वावपि क्रमात् १२
ततश्चोदात्तकम्पे तु यावुच्चनीहतौ च तौ
मध्याद्ययोः प्रदेशिन्याः क्रमात्सन्निर्दिशेदपि १३
विरामे व्यञ्जनं यत्तदुच्चारणवशात्क्वचित्
स्वरान्तरश्रुतिं सम्यक्स्वतन्त्रमिव चाप्नुयात् १४
तथापि तस्य विन्यासे पृथक्स्थानं न निर्दिशेत् १५
एवं हस्तस्वरविन्यासे किं फलमित्यपेक्षायामाह
य एवं स्वरवर्णार्थाञ्छास्त्रदृष्ट्यानुचिन्तयन्
स्वरन्यासक्रमेणैव सह वेदमिमं पठेत् १६
सपूतस्सर्ववेदैश्च ब्रह्मलोके महीयते १७
एवं विदित्वा शास्त्रेण स्वरविन्यासलक्षणम्
ततस्वरावधानं तु कुर्याद्विद्वानतन्द्रितः
स्वरावधानमार्गस्तु दुर्विभाव्यस्सुदुर्ग्रहः १८
तथापि याजुषाणां च सुखबोधाय कल्प्यते
अत्र पञ्चाशतः केचिदाद्युदात्ता भवन्ति हि १९
अनुदात्तादयः केचित्क्वचित्तु स्वरितादयः
त्रिविधेषु च तेष्वादावाद्युदात्तगणा इह २०
उच्यन्तेऽथानुदात्ताद्या स्वरिता द्यास्ततः परम्
विभज्य गणशस्तेषु क्रमात्पञ्चाशतां गणान् २१

आपञ्चमाक्षरं वापि ह्याषष्ठासप्तमाक्षरम्
तथाष्टमं वानवमं तथैवादशमाक्षरम् २२
समानस्वरसंयुक्तान्वक्ष्यन्ते चानुपूर्व्यशः
संख्यो यं ते गणां तेषु क्वचित्कटपयादिना २३
क्वचित्तथैव कण्ठोक्त्या सर्वे पञ्चाशतः क्रमात्
एता न पुस्तका पेक्षं बहुधा सम्यगभ्यसेत् २४
यं पञ्चाशतमुद्दिश्य वाचानुक्त्वैव पाणिना
स्वरन्यासः कृतोऽन्येन तं बुध्वा प्रवदेत्सुधीः २५
एवं विदित्वा यो क्वक्ति तन्निर्दिष्टं सुनिर्णितम्
तञ्च स्वरावधानज्ञमिति वेदविदो विदुः २६
चातुस्वरावधानस्य रीतिरेषा प्रकीर्त्तिता २७
इति चातुस्वरावधानलक्षणपरिभाषा समाप्ता

चातुस्वरावधानलक्ष्याण्युच्यन्ते
२ आद्युदात्तगणाः

नर्या पुरूणि शुन्धध्वमिन्द्रो वृत्रमह द्वयम्
वाजस्येमं प्र इन्द्रस्य वज्रोऽसि द्वे सुराजया
प्राची दिशां वरजनस्सूर्यो देवः पुनर्ऋतु
स्वाहानुवर्षते सन्ते वायुः कार्षिरसीति च
ओज एवोत्त भवति व्यचिष्ठं वातितद्रियङ्ङँ
तपसा जनयस्ताभिश्चात्वालाद्धिष्णुपास्यति
सर्वाणि छन्दां वदति दक्षिसोमस्तनूफणौ
फणौ = २५
१
यद्राष्ट्रभृद्वा अध्वर्योरुक्कामो ब्रह्मणस्पतिम्
इत्याहा शिषमेकस्मै त्रिभ्यः कस्मात्सयावती

इत्याह तस्मादग्नीरोदस्योर्बीजं य आत्मयर्
यर् = १२
२
तेजसा सूर्यवज्रोसि त्वष्टाहद्वे ग्रमेवस
द्यौस्ते पृष्ठमँसाभ्यामाक्रान् सर्वाणि ये पृतन्
आमे गृहा इन्द्रं वृत्रमिन्द्राय त्वेन्द्रमुत्तरेषँ
वा आरण्यमथो देवतापो देवीर्बृहत्पसौ
पसौ = १७
३
आवृञ्जेत्वेकमागः कृस्तोमञ्जमरते पगः
गः = ३
४
तेषामभिग्वन्नपतेन्नस्यनोदेह्यनद्वयम्
दक्षिणो यजमादब्धिः प्रज्ञात्यैरक्षसामवः ।
वः = ४
५
रुशद्दृशेन वेदाश्च परास्य वरुणो दश ।
नास्य स ब्रु च मे वास्मिन् षडत्रानवमाक्षरम्
सौषधीरनुमन्यासै मयि वो रास्त्रयस्तथा ६-१
मन्यासैरुचमेवास्मिन् दक्षिणो यजसौषधीः
परास्यान्न पतेन्नस्य रुशद्दृशेददृश्पशौ
पशौ = १५ श्लोकसंख्याः १०
६-२
अग्मानन्निपवस्वास्य वीरोदित्यैत्र यो हरत्
विमद्ध्यमन्नमो ज्येष्ठायेन्द्राग्नी अव्यथद्वयम्
वसवोष्टाददे ग्रावामधुश्चासाविशञ्च मे

अन्नपतेन्नस्य नम आशुषेणाय यत्समीच्
छन्दांसि विषुकृत्वोऽभिष्वन्नं व इषवोनिमि
सवनम्माद्ध्यमुपन आवर्त्तस्वहवंखरौ
खरौ = २२

६-३

तपोऽस्य प्रेरयस्वेप - हन्तीन्द्राय नमो भवा
त्वष्टा रूपाणि सोमस्य त्विषिरा दद इन्द्रस
इन्द्राग्नी आगतञ्जुषो वाचस्तरति तूर्णितु
मधुश्च देविकास्तेन लोकं यः प्राणतो निमि
रुरूरौद्रस्तदाप्नोद्वै राजसूयस्य संप्रियः
समितं पितरस्सोम्या प्रतिधोनुमिकृत्तिकाः
वै ग्रमुष्टिस्सयोनित्वादवीयो अपसे धश
ममाग्ने प्रसुलामीन्द्रा - यराज्ञे सूकरोरजौ
रजौ = २८

७

यत्र ब्रह्मे त्याहाग्निर्वै देवानाञ्जगतीमिति
आप्त्यै देवा वै समुद्रो वरुणोद्भिः किमष्टमेन्
दक्षिणादोतसन्दिश-वैतेन प्रजानधः
धः = ६

८

वा आदित्यो इत्याहाग्निर्वै नभा समुद्रवः
वः = ४

९

दैवी संसद्वज्रमेवयवंग्रीष्माय उज्जितिम्
भूमिर्भूम्नायदेनन्द्यौः पर्वतादाभवन् परा
ग्रहं सहोर्जापतये स्वाहार्करवा गुहाहितम्

ऋषयो वा इन्द्रमिति त्वाहम्मह्यमिमानिति
भवत्यस्या अग्ने जातान्निर्मुच्येतेन्द्रमेव स
भवन्तीर्न्न प्रभवति
यदामानोमितृ रघौ
रघौ = २४
१०
अगन्मकाममन्यस्यापेतरा यस्सुवीर इत्
छन्दश्शुक्रस्य छागो सि ब्रह्मणैवैनमेह्यवक्
क्षये पाथानुपशव आप्त्यै पञ्चावसे सखा
इत्याह तस्मात्परुषीन्द्राय राज्ञेत्रयश्शिति
इन्द्रो मरुद्भिस्सांविद्ये म्याचष्टे ग्ने महां असि
ओजो ग्रीवाभिहिस्वाहा बहुहायजुषारयौ
रयौ = २१
११
तन्तेदुश्चक्ष इत्याह यदेवास्यै पदाद्धृतम्
अर्चन्त्यर्कमयज्ञो वा उपेयान्मेखला भव
प्रत्युष्टं यासिदाश्वां संकूप्याभ्यो मेदसा स्रुचौ
सर्वाभ्यो वै वै सुवर्गो न ह्यासामाददीय च
भुवो देनिर्वपेद्वातो देवताग्रे बृहन्नुष
पाङ्क्तो यज्ञो वर्च्च इदं क्षत्रं सलिलवारकौ
रकौ = २१
१२
अन्वेति न शका भौमी दम एव भवन्त्यमुम्
परान्दैन्द्राज्यसि प्राची सर्वाः प्रजा न हस्मदः
दः = ८
१३

यस्त्वा हृदा वैरेतोधाः प्रहारावंस ईश्वरः
इन्द्रो वृत्राय यूपस्य यदूर्द्ध्वञ्च ष चक्षुषी
इत्याह ब्रह्म एकस्मै स्वाहा ह्वेन्द्रो वलस्य बि
अहर्मासेन वातेन यदग्ने यानि कानि च
यावन्तो वा अथो रूपेणैव त्रय इमे कथौ
कथौ = १७

१४
निशितायामवेक्षेतेत्यब्रवीदिति लोमतः
त्वमग्ने रुद्र इत्याह प्रजावा उत्तवस्व्यसि
समिद्धो दक्षिणो युक्तश्शान्त्यै पार्श्वत उत्सृजे
देवीरापोदब्धो गोपा अभ्रातृव्यस्ते एन हि
यन्नस्समावधूतं रक्छूरोवात्रीणि चश्पधौ
पधौ = १९

१५
य एकादश इत्याह स्योनैवैसं वपामिसम्
यद्वादशर्षिमार्षेयं पापीयानृषयस्सप
यदछन्दोधिपत्नीर्न्ना परुदत्तेह सर्व तु
सोमं क्रीणी तवाग्ने वा ब्रह्मजज्ञानमित्कलौ
कलौ = १३

१६
इत्याह दिव्यमीवास्त्वमग्ने ब्रह्मद्वयो दधा
पयसा जुवसूनान्देवञ्जिघांसाद्रुहः पचः
चः = ६

१७
ज्यैष्ठ्यञ्च प्रतितिष्ठन्त्येकारुक्तान्यपहन्तिपु
पूर्वयाभिजयत्याद दत्रृतस्याहुतं प्रजाम्

अवरुन्धे चतुश्च सा वसिष्ठो हत पुत्रभ्भः
भ्भः = ६
१८
विश्व एनं वसुभ्यस्त्वाश्मा च मे मृद्धिरगयमु
ज्योतिर्द्धत्ते तु रसवान्वसवस्त्वा प्रवृहसः
सः = ७
१९
रोहितः पृशत्रिरिन्द्रस्य क्रोडो वास्तोष्पते प्रति
उदितेषु निवर्त्तस्व शचीभिर्वर्मचस्थहि
जागतेनोच्छयातीति ब्रूयादयातया पटौ
२०
उत्तरं बर्हिषेत्याह प्रजापतिमुपाह्वथाः
ये देवा दिव्या जगामानुत्वामाताम ऊर्क्षमे
वैकंकतीमुपाप्नोतीति माकद्व्रदितिः पुत
नम आव्याधितपसस्तनूस्सोत्तरवेदिर
यद्वारवन्त्योषधयस्सो सोमाय स्वरा कथौ
२१
वसो पुरु स्पृहे त्याह प्रजापतिस्सधृष्टिर
रेतो धिषीये भुवनस्य रेतः
प्राजायत स्यात्तु व्यवैर्यत स्यात्
इत्याह सप्त सप्तेति वृणीद्ध्वंशन्तमेनत
रराणो विषुरूपे वै दशरात्रेण भारती
वै यज्ञाश्वस्तूपरो वा अहोरात्राणि नक्तमु
मधि गृह्णामि संनह्यत्ये वैनं संस्तुतापकौ
पकौ = ११
२२

सनो मुञ्चत्वं हसस्यादेक एवैकपद्धतिः
२३
यो विद्विषाणयोर्भ्राजो स्यत्यँ हावरं वृणै
प्रमुञ्चास्वस्त इत्याह पितृनाधारयत्ततः
इन्द्रं वो विश्वतो न्नस्य रूपमाकूतिमग्नि तु
वाजोनस्सप्त आकूत्यै चतुष्पादस्त्रयोदश
२४
पयस्वद्वीरुधां वाजमग्नेह्यश्वान्मनुः पृथि
मनोविष्वद्रियक् स्वेन भागधे येन आपतिः
वा अर्द्धमाम्विष्णुमुखाः प्रजायेरन् प्रसिध मे
द्विभागं परिपश्याम उपानक्त्यप्रतीत्तहि
कक्षेष्वाहुतयस्तस्मा उहव्यमाविशस्वतु
पन्थामनू आयनाय यत्रैधांगिरसोऽप्यथ
सूर्योमादेव पुरुष आत्मा भवति सौम्यहि
व्यायच्छन्ते वरुन्धे मुञ्चाग्नाविष्णू महि स्मतु
त्वौषधीभ्यः प्र इत्याह प्रजास्वेत्रीञ्छिति ह्यपि
कस्त्वाच्छ्यत्योषधीभ्योष्टत्रिंशत् समभवत्तथा
२५
यत् पृषदाज्यमित्याह देवानां ह्येतदो जहि
इन्द्रं वो विश्वतस्परींद्रंत्रिषाह स्त्रवैव वः
वः = ४
२६
सोमाय पित्रवरुन्धे तार्प्यै दनुमते त्ववै
सोमः पिबतु सोमन्ते सन्त्वासिञ्चामि कर्मणे
मामा हिंसीरिति स्वाहा कारेणानातुरमृड
चतुर्विंशतिमन्वायुष्मन्तो भवति पुण्यस

समास्त्वा देवसवितः प्रकाष्ठांगच्छ रोहिता
योगो योगेऽपि दद्ध्यात्प्रमायु देवावसव्य तु
अथा त्रिरददानैह्यासामेकविंशत्यामाष इत्यपि
मासास्संवत्सरोरुच मदधूपदधातित
चित्तिञ्जुहो यजमानो हन्येकस्त्वायुनक्ति हि
हिरण्यवर्णाश्शुचय एकोनत्रिंशदीरिताः
२७
नासोमया ज्यालभेत प्रजापमयिधे हि च
ज्योतिषा भूवमित्याह सर्वस्य प्रतिशीवरी
अन्नं सप्तदशो नैनं शीताग्नाविष्णु किं स्विदा
गर्भाश्चैका च मे पक्का मतयो हस्तयोस्तप
भुवनं यजमानस्यायतनं रजसीत्वपि
मलञ्जायत आयुष्ट आयुर्दाष्टा दशैव हि
२८
रथेन रक्षस्सवनमष्टाभिरुपयन्ति हि
त्वामग्ने वृषभं पञ्चाक्षरापङ्क्तिरनामृते
तस्मादाग्रयणेपीवर्यस्य वै ब्रह्मवर्च्चसम्
यजमानस्य यदना यत्कर्णावगतास्य विट्
पुरुषाणां रूपमपि पृतनासु त्रयोदश
२९
अपि कृन्ताम्याहिताग्नेर्मनसा मा सरस्वती
तथैव यजमानाय स्वावरुज्ज्य षट् तथा
३०
इन्द्राग्नी रोचनामन्त्रमपश्यदनुमार्ष्टुत
संपश्यामि द्वे वरुन्ध एतावद्वै पुरुह्यपि
आलभेतादित्य चतुष्पद एव पशु न जः

३१
संयत्त इन्द्रियेणायुर्दधाति सर्वमायुरे
त्वं सोमाप्यायतामग्न उदधे पयसा जुहु
उदेनमुत्तरा द्वेऽग्ने अंगिर्रश्चोपधावति
वज्रो वषट्कार उपदधाति द्वौ त्रिवृत्तथा
बलाय वीक्षमाणाय यास्ते अग्ने समप्यथ
अथ चैकादश प्रातग् प्रजायामहैपथौ
३२
हिरण्यसाणिमातिष्ठ वृत्रहन्निहरामिते
वाजस्य माप उन्दन्तु विख्येषमुपगन्तन
पतयस्यामानुमत्यै विभक्तिं वरुणं सुषु
रोदसी अपृणादिन्द्रमरुत्वो वर्च्चसे पव
यत्कामादेवसवितरेतत्तेशर्म यच्छतु
वर्द्धन्तु त्वा यजमानः प्रस्तरस्तस्य ते ददत्
आमनस्य समृद्ध्यै प्राजापत्यमिषुमत् भ्यवै
ये ते सरस्वः प्रतितिष्ठति घृद्रविणं सप
मानो हिंसीत् स्तोमभागा उपेत्याह यथा यजुः
प्रच्यावयन्त्ववरुन्धे मद्ध्यतं भजसौ श्रव
क्रमोऽसि वरुणेनास्य तेभ्य उत्तरवेन्दिहि
नमस्ते रुद्रासुरा न जयन्नायुर्दधाति पु
असुवर्ग्यं यजमानो होरात्रा व्यतिषज्यतु
अवरुन्धे पशुपरिमिनुयात्सप्त वै तथा
प्रतितिष्ठन्ति पृष्ठं वै ज्योतिष्टोमं प्रथं भणौ
भणौ = ४५
३३
नवो नवो वरुन्धे संवत्परा भवति प्रया

इत्याह पितृदेवत्याहर्यतन्त्वो जसे जुहो
प्राशितं रेजते अग्ने पृथिज्योतिरधारयत्
व्यर्वं वृङ्क्ते कनीयासमुपयन्त्यन्वसृज्यत
एकादश कपालं द्वे एकयास्तु वत प्रजाः
अनवरुद्धस्याश्त्रीयात्प्रतिष्ठा पयति स्म हि
अग्ने तेजस्वि छन्दांसि वृङ्क्ते परुणयत्यथ
तथा रथपतिभ्यश्च वोनद्वाविंशतिस्तथा
३४
चतुष्कपालाज्योतींषि कुरुते हरिरस्यपि
आवायो द्वे अदब्धेभिरोमासः प्रच्यवस्वभु
पर्यग्निप्रतितिष्ठन्ति त्रयो वाचं दधाति हि
छन्दसामवतुस्माप - चितिमान् संश्रवाहसौ
आप्यायस्वमदिन्तेति संख्याः पञ्चदशात्र वै
३५
तेजस्कामस्येष्टिमप - यजमानश्च सीदत
यावामिन्द्रा यजमाना - यचिप्रवदितोः प्रषट्
३६
वसवस्त्वाधूपयन्तु पृथगेकं प्रकीर्त्तितम्
तथा ज्योतिष्मतीं त्वासाप्येकं प्रत्येकमेव हि
३७
नमो दुन्दुभ्याय नम - इरिणयातिष्ठतीव हि
छन्दसां वीर्यमासामराजन्यो मनु पञ्च च
३८
नम ऊर्व्याय च स्वञ्चमसस्ताम्मिथुने पतु
मयि वीर्यं द्वयं तस्मा उक्त्थ्यमेव षडेव हि
३९

समुब्जितो निवीतं तु कृष्णोस्याथर्वणश्चतुः
४०
होत्रा मयि द्विसंख्याकौ
४१
प्रयन्ध्येक उदाहृतः
४२
बृहस्प प्रागाच्छ - स वैददेवतयापमी
हिमा इत्याहको अद्य युक्तो धुर्या च पुष्करम्
नमस्तीर्त्थ्याय वै मृत्यु बन्धवो मम नाम तु
अग्न आया ह्यैति सोमच्युतमित् बिभ्रदागहि
यं कामये तापशु स्याद्यस्मिन्नश्वस्तु यत्कल
इत्याशीर्पदया वा सस्सर्वाभिर्वाजँ हनू
त्वष्टुस्सोममभीषापो वरुणस्य भवत्यनि
य एवावगतस्त्वन्नो अन्तमस्तु क्रतुं वरु
योक्त्रं गृद्ध्राभ्यन्नमवरुन्धे तावदुपाप्न तु
ये वाजिनं यो देवानां दश संपद्यमेव हि
बिभर्ष्यस्तासतेन्धाना उत्क्रामद्वेष्टितं गवौ
४३
वात्ते यथा वै समृत सोमा अक्षन्नमीमदन्
इन्द्रश्शत्रुर्न्नये दैभ्यो यस्य मुख्यवतीः पुर
अन्नं प्रयच्छति द्रापे वातो अनुक्रमैरति
अथो पञ्चाक्षरा तेषामसुराणां शिरः प्रति
यं कामयेत पशुमान् स्याद्वा एष सिसीर्षति
वा एतं दीवसोर्द्धारां नमस्सोमाय तत्पथा
वनस्पती नमः कूप्या अहन् सामभवत्यपि
बृहस्पतिर्हैति नग - तमनाभवतीरघौ

रघौ = २४
४४
श्लोकसंख्याः १००
अग्न आयूंष्यहस्तस्मिन्नैन्द्राथो तेजसानुप
छन्दांस्युपत्यया श्रोत्रं प्राचीरुपदधातिप
गर्भाः प्रावृत्प्राञ्चमुपदधाति विवयं रुहे
इन्द्रायान्वृजवेविष्णोः क्रमो स्येकादशे त्यपि
४५
बृहस्पतिरकाश्वृन्मेग्ने विश्वेभिस्वनीकदे
ये ते पन्था नमो अग्रियानमस्सहमापि तु
गर्भेणा विपराताभ सप्तै वात्र प्रकीर्त्तिताः
४६
(नमो हिरण्यैकं वाचमवरुन्धैकसंख्यया)
४७
हिरण्यबाह्येकम्
४७
स्यात्पूर्व आलभन्त हि ।
दैवीन्धियं वाचमवरुन्धपात्रे चतस्र तु
बृहस्पतिस्त्वातु भवन्त्येकहायनषट् तथा
४८
बृहस्पतिसुतस्यैकम्
४९
बृहस्पतिरकामकः
कः = १
५०
खलु वैनसहासीताग्ने गोभिर्यथ्समावदि

स्याद्रात्रिं प्राविशत् सन्ते मनसा तेन पुंस्वतिः
स्फ्यस्वस्तिरासीद्यदि वा प्राचीमन्वोज उत्भृतम्
द्वेष्टियश्चैभुव इति सन्देवानं पवित्र तु
द्वाभ्यां स्वाहा तदुभयन्नेष्टः पत्नीमुदानय
इन्द्रो वै शिथिलस्सोमो यन्माम्माता तथा खरौ
खरौ = २२
५१
य ईयुर्यस्सहस्त्रेण ये देवायज्ञ वैतृती
सरुषस्त्वन्तु
वनस्पतिभ्यस्वाहाथ वनस्पतीन् प्रजां पशून्
रीया यत्कूर्मं यो ज्येष्ठबन्धु च
तथा बृहस्पतिर्देवानां यान्ये वैनमित्यपि
नयज्ञस्सूर्य इत्याह तथेन्द्रः पत्नियामनुम्
अग्ने भरन्तु तं प्रत्नथा पू पञ्चदशात्र वै
५२
केशैर्बृहस्पतिर्वाचान् दधत्पोषं रयिम्मयि
वद्ध्यं प्रपन्नं त्र्यविर्वयस्तुभ्यमितीति षट्
५३
अथैकं वेदमनसा
५४
यथा वै मनुषास्तु यः
यः = १
५५
वाजा इत्यहरेकोगौ रसावायुर्द्वयन्तथा
वा एतस्येन्द्रमिच्छन्दो यद्वादत्रींस्तृचाननु
वाचं संज्ञा इयं स्वाहाधिंग्रहान्वैदधिह्यपि

सुवर्नज्योतिवैदेवा असुराणां तु वा इयम्
याजातावा अग्निर्याचान्वैदेवा उज्जितिं तथा
आपो वै सर्वा यदग्नीषोमावप्येकविंशतिः
५६
सेदुहोताश्रौषडिति यदिसोमौसँसुतौ
उदुत्यं यजतेप्यन्न्यं रसं वृष्टिन्निहो अति
आयन्दक्षन्वरो देयस्साह्यासीत् सकपिञ्जलिः
होतास्व एव यदुभौ यद्वास्कन्दात्तु तत्प्रजाः
तस्मान्नाभागमग्नेयं तं शृतं स्फ्येन वेदिमुत्
तामेवैनानथापोवै सोमो वै साविराडपि
अम्बि अंबालिवा एते देवाश्मन्नूर्जमित्यथ
प्रतिवै जज्ञिबीजं य एवं विद्वान्द्वयन्तथा
इतीमामेववा एतत्पशुं यावांकशामधु
यास्तृतीया वयोवैमात्रैवेत्याहान्नमेव हि
अग्ने दादाशुषे सप्तत्रिंशत्संख्यो समीरिता
५७
त्वष्टेदं य इमा विश्वा धनुस्तत्षट्पदान्यनु
वा एतां पत्नयोऽग्रे तु अत्यन्न्यानपिते दश
५८
वै तिष्यस्सोम इति योपगुराहीति सो ब्रवीत्
विप्राह्यास्यैन्युवा एषोस्मात्तद्वीर्यं यसप्तहि
५९
आर्त्तिमार्च्छेन्नमस्तेभ्यः परा वै किञ्चन ह्यपि
य एवं विद्वानग्निं द्वे प्रदेवन्द्यामि मञ्चयो
आयानियत्पशुर्मायुं शिरो वा एतदित्यथ
वा अस्या अमृतं त्वासं तानि तेन तु मक्षिका

अश्मन्नूर्जमिति घ्नन्ति य उद्यन्तस्तथैव हि
नमो राज्ञेथ खलु वै यज्ञेनाग्ने तव श्रवः
भवत्यथ तदिन्द्रो वै सगावो वै द्वयन्तथा
यथा वै पुत्र आयुर्वा यथाहं सप्तविंशतिः
६०
तामेकं स्वां अहन्त्वेकं त्रीणि वा वैकवत्पृथक्
ओजो वै वीर्यमेकं स्यादप्सोनमैकमत्र हि
६१
यदीतरं यदाकूताद्यथा सति विपाजसा
यो स्वै सप्तदशं यद्वे इव ब्रूयादुदायुषा
शमोषधीभ्य आब्रह्मन्नग्रे पश्यत्स उत्तरः
स्यात्तन्निरवपज्ज्मन्नुपवेवावरथं पवौ
पवौ = १४
६६
अपामतिं यदक्रन्दो यदाज्येन प्रया तथा
स्याद्यदेकेन पञ्चोब सोमोधिपतिषट्तथा
६७
सञ्ज्योतिषा तद्धिरण्यं सपापीयान् भविष्यसि
पूर्वैरिष्टास्यामतनु तथा चर्म्मावभिन्दतु
यमबद्ध्नीत सवितानामेत्याह च सप्त च
६८
शरोवकावै पवमास्युस्त एकत्रयस्मृतः
तां वा वतु हितद्वेद यो अत्याग्रवणश्चतुः
६९
इन्वा उपस्तीर्णमूग्वै यवो वा वै तदाह तु
द्वे वा वदेवस्युस्तेवि ब्रह्मान्त्वं हितमन्वभम्

यद्वै होता तथा यो वा ग्रयथा देवतं द्वयम्
यो वा ग्रश्वस्य यद्वा ग्र - नीयो वै पवमा कलौ
कलौ = १३
७०
वा वयः पवते कं स्यादुदात्ताद्या इमे क्रमात्
७१
ग्राद्युदात्तगणास्समाप्ताः

३ ग्रनुदात्तादिगणाः

ग्रथानुदात्तादि पञ्चाशत् गणा लिख्यन्ते
प्रजापतिस्तावरुणमंशुना ते ध्रुवक्षितिः
सजोषानस्समनसौ पथिभिर्देवया न तु
न स्त्वँसोमपितृभिस्ते हिरण्यशृमथनम्
ग्रप्ये वैनं समानानाम्मेषस्त्वात्वग्नये पथि
ग्रग्निं युनज्म्यहन्देवयज्यया प्रचरन्ति हि
यज्ञान्तायत्रता सृष्टास्सोस्मादेकादशिन्यपि
ऋतुभिस्सक्षुरपविर्न्नवरात्रं परे सति
ग्रादौ प्रजापतिरिति संयोज्याष्टौ वदेत् क्रमात्
एवाहुतिं तृवृदग्निष्टोमो ग्रन्वाहरत्यपि
देवता तातुपितृवी - तस्योर्द्ध्वा ग्रस्य संरधौ
रधौ = २९
१
श्रितास्सहस्त्रशो ग्रग्निश्चमे घर्मो विभूरसि
प्रजापतिष्षोडशधा द्वितीयामुपधाय तु
स्यादभ्या रोहति शरी देवो वस्सवितोत्पुना
ग्रन्वाभजत्सजो ग्रष्टा कपालं रक्षसो दह

स्यात्प्रजापतिराज्यञ्च स्याद्रक्षांसि शुचार्प्यय
तथा च यजमाने च इद्ध्मश्च त्रिपदागतु
स्यादग्नये गायत्रान्येशतरुद्रीतिं पदौ
२
हविष्मतीरेव भवत्यग्नये वायुरस्यपि
एतत्कुर्वन्ति तनुवामेसदेवेभिरिन्वितम्
प्राणा उपरवाविश्वकर्मा स्यादिति सन्तराम्
एव वैश्वानरमवत्वग्निर्वैश्वानरोऽपि च
अग्निना विश्वसंसृज्य पृथिव्ये तत्करोति च
एवावरुन्धे यद्येते सोमपीथेन षोडश
३
सूक्तं भवर्त्वँशुश्च आशीर्गच्छति यानपि
स्यात्प्रजापतिर्देवेभ्योऽन्नाद्यं श्रद्धामना हवि
उपरिष्टादेवजिन्वेत्याह यज्ञपतिंदुहे
स्यात्प्रजापतिः प्रेणानुनियुतञ्च दशैव हि
४
एष ते गामयुः प्राजा एवास्मा इन्द्रियं --
मातरञ्च प्रजां सोमा रौद्रम्मातृतमासु च
अथो पावर्त्तते नक्तोषा सैवास्यापुवायते
अथ प्रजापतिर्दूतीरेवत्वम्मनसो नव
५
मरुत्वं तम्म इत्याह तृतीयमपचत्तथा
देवस्यत्वासप्तभवत्यधिदेत्वाविभूमने
ऋतूंस्तन्वत एतस्य स्कन्दत्यभिजयत्यपि
जितन्त एव भवति कृष्णा चातयमानतु
चन्द्रमाजायते लोकमजिगांसर्गंस्तु मे महः

गोष्ठेरिरीहिसौम्येन दधात्यष्टाक्षरा गहि
सजित्वानम्म इन्द्रश्च मे चतस्रश्च मे रसौ
रसौ = २७
६
इडो जयत्युपरिष्टादिन्द्रयग्नेर्मन्व एव च
प्रजापतिर्ये नयन स्यादग्निर्वैश्वकर्मणः
स्यात्कामयेत पशुमानियन्ते त्रिंशदक्षरा
अथैतत्सर्वदेवत्यं षट्भिर्दीक्षयतीति च
पतयन्तञ्च ऋतुभिस्संवत्सरमिमं यम
स्यात्प्रजापतिरन्वायन् स्थतेषां वीरुधो भवम्
तथा पशव उच्यन्ते संख्यास्सप्तदशात्र वै
७
स्यादुपामन्त्रयन्ताथ नियुत्वत्यायजत्यपि
पुरो हविषि पाह्यायुर्मे सद्यो दीक्षयन्ति च
वित्तायनी मे सिचि त्रयाय शुक्रासुते तथा
तथा प्रजापतिर्देवासुरान्धर्त्राय गृह्ण च
देवेषु च स यज्ञेन कल्पतां सा मिमार्जयम्
अमित्रमर्दयैवैनं युक्तीमामगृभ्णातु
मरुत्वां इन्द्रसमिधं यक्ष्यग्ने राष्ट्रकामतु
स्यात्पर्यावर्त्तते हुत्वोद्गृह्णाति स्वप्सु वा यज
सहस्राणि सहस्र स्यात्तथा पशुमकुर्वत
देवानामेति निष्कृच्चेत् पञ्चविंशतिरेव च
८
अंशुरंशुस्सुशर्मासि सप्तभिर्धूपयत्यपि
पुरस्तादसृजो भावामुक्थेषु शवसस्पते
च यजमानस्य चापि समिधो यजतीत्यपि

जीमूतस्यैवावरुण्डे पञ्च संवरणे भव
नो अश्वेषु तथैव स्यात्संख्यया द्वादश स्मृतः
९
अथायतने शमयत्युशन्तस्त्वाहवामहे
अयं वा म्मिप्रजापतिर्दशहोतारमेव च
तथा प्रजापतिस्सद्वादश रात्रं तु पञ्च च
१०
प्रजापतिरिति प्रजास्सृजे यान्नादतु द्वयम्
११
अथ प्राचीनवंशं स्यादेकञ्चैवैकपद्धतिः
१२
सुतासो वृष्टयश्चैव त्रिवृद्ध्यग्निस्त्रयस्मृताः
१३
पूष्णो वनिष्ठुरग्नेरातिथ्यन्त्वभिमृशत्युप
उभयोल्लोकयोः प्राणैर्दाधारशरदात्व च
मे शर्म्म च हतष्षोडशभिस्संगच्छते तथा
स्याद्वायवे नियुत्वस्यादष्टविन्सागा अपामसो
अथैवैनं देवतया प्रजापतिर्वरुण्यपि
याहीत्याह च युष्ठानीतश्च न यज्ञस्य घोषद
अन्नाद्यमान्मन्मूर्द्धानं - च विश्वदेव इत्यपि
तथा देवेभ्य एवाथ इच्छमानस्तथैव च
स्याद्देवता शतभिषक् त्रयोविंशतिरीरिता
१४
स्याद्यन्त्यथोरिषः पातु नक्तन्द्वाविति निर्णितम्
१५
स्तामित्याहाशिषञ्चाथासीति पञ्चात्प्रतिद्वयम्

१६
मृत्युर्गन्धर्वस्त्वाद्धज्या अजायां घर्म्म च त्रयः
१७
वेधसश्चैकमेवात्र
१८
सन्ना असन्प्राणमस्मिन् अग्निना रयिमश्नवत्
शस्तोक्थस्या यज्ञपतिं भगाय क्रूरमित्यथ
अथ प्रजापतेरक्ष्यश्वयद्रश्मिरसिक्षया
परस्तादर्वाचि परस्तादभिद्विन्दते प्रजाम्
एवैभ्यो हा कामयेत वसीयांश्च ऋचः प्रण
स्याच्छ्तं कुरुतेत्यब्रप्रजयापशुभिर्मिथु
वा अस्या अमृतं त्वग्निश्च म इन्द्रश्च मे पदौ
१९
लोकमेति द्विपादश्च पुरस्तादैन्द्र एव तु
प्रजापतेर्जायमाना अमुष्मिंल्लोक इत्यपि
स्यादात्मानमेव यज्ञयशसेन तु षट् तथा
२०
एतया संज्ञ एवास्मै पर्जन्यं तर्णिर्वि च
प्रजापतेस्त्रयस्त्रिंशद्देवतया समृद्ध्य च
स्यादग्नये गृहपतये पञ्चैवात्र संख्यया
२१
जमदग्निर्देवता अ- भ्यारोहन्तिद्वयन्तथा
२२
ऋतस्य रश्मिमर्द्धेतोद्ध्रुवासिधरुणास्तृता
स्यादग्नेः पक्षतिर्वायोः पक्षत्याहाग्निदग्नि च
दिव्यं गच्छ स्वाहा सप्त

२३
विश्वकर्माविदेकवत्
२४
असावादित्यो न त्रीणि स्याद्वाचामेन्द्रिये चतुः
२५
यज्ञाय चैव या मुष्मिंल्लोक उपास्माकं वीलः
लः = ३
२६
पशव स्युर्यदेकं स्यात्
२७
आहेत्याह प्रसूत्य च
एतानि दिवि चैवान्तं गत्वा प्रजननं तथा
२८
स्यादृता वा धर्त्ता लोके पशुमान् स्यात्तु षट् तथा
२९
उपरीवहिचक्रुद्धः पैतं सोमेन्द्रचत्रयः
३०
यज्ञमापत्प्रजापतिर्वा अवायुर्हिमित्यबः
बः = ३
३१
स्वाद्वीं त्वास्वादुनाचित्तं संतानेक्षुरपव्यथ
देवानामूर्ध्वं पुरस्तात्प्रत्यञ्चः पश पञ्च च
३२
पदपङ्क्तिश्रुतं गर्त्त चरित्रायाग्निरेव च
तथाप्युदयनं वेद अग्नयेंहोमुपञ्च वै
३३

एवं शं सत्यपशुभिः प्राणानं तद्वयं स्मृतम्
३४
धात्रे पुरोडाश शंभूर्मयस्ते पत्नयस्त्रयः
३५
अग्निना देवेन चैकम्
३६
प्रजापरेर आपत्यकः
३७
वीतये तु प्रजापतिर्मनसा ऋतुवर्त्तुलः
३८
एवैनं देवते ज्येषेत्वोपवीरसि च द्वयम्
३९
प्रजापतिर्वावतथाधीतिभिर्हि द्वयं तथा
४०
विश्वरूपस्तथाचाग्निः पृथिव्यैतावतीर्वगः
४१
पशुकामस्यात्स एकम्
४२
तथैकं यत ईश्वरः
४३
देवा मनुष्याश्चेदं वामेवतेजस्विहित्रयः
४४
अथार्द्ध्यवान्दसा वादित्योऽस्मिन्द्वावेवकीर्त्तितौ
४५
पूषा प्राश्य च देवा वै राजन्याद्वयमीरितम्
४६

देवा वा इन्द्रियं वीर्यं व्यभजन्तैकमेव हि
४७
एवैनमाह लोकानां विधृत्यैसौम्ययैवगः
गः = ३
४८
ऋतस्य गर्भ उत्तिष्ठन् लोकेभ्यस्संभरत्यथ
यज्ञस्याशीर्गच्छति स्म एवोभयत इत्यपि
ऋद्ध्नोति स पुनर्ल्लोकमभ्यारोहन्ति यत्तथा
पिशंगाः पशुमालभ्यमित्रं देवास्तथैव च
आत्मानमाप्रीणीतेति संख्ययैकादशस्मृतः
४९
च न प्रत्यवरोहेत्कः
५०-१
दशभ्यस्वाह चैकवत्
५०-२
एव यज्ञं दुहे बर्हिषोऽहं त्रीणि तथा स्मृतम्
५१
एषयज्ञस्य रुद्राणामाधिपत्यं तु चिद्धिते
अयं वेनश्चोदयत्स्यादग्नीध आदधाति च
प्रजाभ्योमानुषीभ्यस्त्वममृतं हिर सप्त च
५२
महीदेवस्य चर्त्तुष्वे वसं वत्सर इत्यपि
क्षत्तुर्गृह उपद्ध्वस्तस्साक्षादेव चतुस्मृतः
५३
हृदे त्वा मनसे वाममद्यपुष्टं पशु ह्यपि
तथा समिधमातिष्ठ स्याज्ञातं जातवेदसि

पशूनेवावरुन्धे तु सुरेतारेत एव च
जुहोति यजमानं स्यात्क्षत्रं विश्वत इत्यपि
स्याच्छतानि त्रयस्त्रिंशदेव तास्ता अरीरधा
अग्नये कामाय एव विश्यद्ध्यूहति राष्ट्र च
उपस्थे विश्वानि यज्ञस्य शिरोच्छ्यग्नये प्रतीक्
पाप्मानमपिदैवैनं वै भीदक्च सहर्षभा
अग्निर्बृहद्व्याः प्राण उपरिष्टादपारकौ
रकौ = २१
५४
स्याद्यज्ञस्य समिष्ट्यै तु एवैनमवरुन्ध च
एवं विद्वां दर्शपूर्ण एवैनं भूतिमेव च
अथाग्नये समनमदग्निश्चेदं करिष्यथः
स्यान्मायामायिनां विश्वमिन्वसप्तप्रकीर्त्तिताः
५५
रूपेणैवावरुन्धेथ स्वधायैनम एव च
स्याद्देवीर्विश्वदेव्याग्निर्मादुरिष्टाच्चतुस्मृतः
५६
अथाशिरमवनयत्यग्निर्वृत्राणि च द्वयम्
५७
प्रयुज्य न प्राणमेव प्रथमेन च युञ्जते
इषे त्वा भिषजौ ताभ्यां द्वितीयो गह्य एव च
कद्रूश्च वै तीर्थमेव यज्ञियन्नाविमित्यपि
पुत्रं क्षितस्तु संभृत्य तेज आत्मन्दधस्महि
प्राणेनैवास्याप अग्निः पशुरासीत्रयो दश
५८
चतुर्भ्य स्वाह इष्टर्गो वैधातारातिरित्यपि

स्याद्देवतामुपैत्याहुस्ते त्रीरायपि तु पञ्च च
५९
अथान्यादेवतास्येकः
६०
ऊर्द्ध्व ऊषुण ऊतये
पूषार्द्ध्नोत्सत्यमनयोः प्राणस्त्रिवृतमित्यथ
एवैनमुद्यच्छते स्यात्पञ्चभ्यस्वाह चैव हि
कृष्णाय स्वाह च प्राणाय स्वाहाष्टौ समीरिताः
६१
श्येनाय पाग्नये स्वाहा वायद्ध्नोत्येव यो स्यलः
६२
राज्याय सन्तमेकं स्यात्
६३
तृतीयात्पुरुषात्सोमं समीचीनाम च द्वयम्
६४
राज्याय सन्तं राज्यन्नो पनमेदेकमीरितम्
६५
अस्यूर्जमन्तरमृतं देवस्याहं तु बन्धुता
यज्ञं शृणोति चादाय तदेभ्यो रुद्रमन्तरा
इतासुर्भवतीवीरश्शतमन्युश्च दत्वते
शता यस्याहा पवित्रमसीति सन्त्रयो दश
६६
ऐन्द्रश्चरुं त्वग्निमेववरू इदमहङ्वयम्
अर्वाङ्यज्ञस्त्वेषयज्ञो यत्रैधायं पुरो हरि
प्रजां पशूनवृञ्जैष यज्ञो यद्दशरात्र च
सिताय स्वाहाथ चतुष्वेव प्रतितिवै पकौ

६७
एत एतान् प्रजां पशून्यजाग्निना तपस्त्रयः
६८
अग्निर्देवेभ्योप एकम्
६९
गणामेमावितृष च
देवा इमां वाचमपि पशवो वा इडा स्वयम्
यज्ञ एवान्तरिक्षे तु चत्वारिर्ये तानि वै तथा
७०
पशुभ्यो नान्तरेऽपि च
सौरी बलाकेममेवतेनलोकं श्रियै गतु
देवानां वा अन्तमग्निना वै होत्रा दशस्मृतः
७१
अथेयमेवसायैकम्
७२
नृदेवडिति व्यतु
अयं पुरोभुवः पृष्ठैरेव भद्रादभिश्रघः
७३
कूर्मान्छफैर्यज्ञियन्तेनत्वाराकामहन्तथा
ऊर्मिर्द्रप्सोऽग्निर्भूतानामृतवो वै प्रजा तथा
यज्ञेन ता उपयद्भिरेवलोकेषु प्रत्यपि
बृहदन्नाद्यस्य देवाः प्रातराशुस्तृवृत्तथा
यज्ञो देवेभ्यो भिषाविति प्रजववत्पवौ
७४
मातराचापिनोद्वेष्टिमात्रे वत्सं समिद्दिगः
७५

उत सन्दृक्प्रजै वास्मा अन्नमवत्रयस्तथा
७६
उक्थं वाचीन्द्राये त्याह प्रत्येकं स्यादेकं प्रोक्तम्
७७
तथा अग्निश्च वा एतौ अन्ये वा वै निधिं द्वयम्
७८
कदाचन स्तरीस्सोतुर्बाहुभ्यां देवतास्सद
एवं विद्वानग्निमनयै वैनास्तु मृदाचिनोत्
चित्तञ्च चित्तिर्देवानां तमेवास्यै परस्त च
अग्नये स्वाहसोमाय द्वयं स्यादिति नीच तु
देवास्तृतीयं सवनं संख्या द्वादशकीर्त्तितम्
७९
वृत्राय वज्रं प्राणैरेवैन यज्ञेन वै दवाः मुद्यच्छते तथा
अथ यज्ञेन वै देवास्सुवर्गं त्रीणि संख्यया
८०
प्राणैरेप्रयन्त्येकन्तथैव परिकीर्त्तितम्
८१
आहोर्ज्योह्येचरुः कार्यस्त्वग्नेर्भागद्वयन्तथा
यज्ञस्य स्विष्टं पञ्चैते
८२
सूयते वैकमेव च
८३
पृथगेकं प्रयुज्ययामपां गर्भं तथैव च
पश्चात्समीच्विभूर्मात्रा प्रिय आत्मापियन्तथा
अग्निर्मूर्द्धा इमानेव लोकानभ्याजघासस
पशून्निर्याच्यैव मृत्योर्द्धत्ते देवानुपैति च

गमद्ध्य एषां लोकानां मरुतो वैद चेत्कठौ
८४
परोक्षं वा अन्ये लोके पशवो ये द्वयं तथा
८५
पूर्णापश्चादिमे लोका इमानेव तथा द्वयम्
८६
दिवस्परिप्रथञ्चाग्निम्मनसा संवतोवरान्
घासं प्रदेवास्त्वेन्द्रज्येशुगठास्त्रकाल आगते
स्यादेव तद्धात्यन्तरिक्षं गच्छाष्टसंख्यकः
८७
एष वै देवरत् पश्चा प्राचीमुत्तद्वयं स्मृतम्
८८
त्रिंशत्त्रयश्च गणयैत्तं यक्ष्मो भाराधसस्सह
अभिसंभवतो देवैर्वसुभिः पञ्च ईरितः
८९
स्याद्यज्ञो दक्षिणामभ्य - द्ध्यायदेकं प्रकीर्त्तितम्
९०
वशामालभ्येवस्वेन त्रयमन्तर्विभाति च
यज्ञं प्रत्यतिषिस्तेगान्दमियं वै रथं तजः
९१
भूतं भव्यं ह्यद्यवसुह्यभिसंपद्य च त्रयः
९२
रयिञ्चितो बृहन्नद्रिरेवाग्निं चिनुतेऽपि च
अमूञ्चोपदधा मित्रावरुणानाथितोऽपि च
एवैतेन करो सौम्यास्ताश्शंय्योरावृणीमहे
९३

यज्ञं विच्छिंद्याद्धिचान्यन्मुखं कुर्यात्स्त्रुवेण तु
अथाग्नये नीकवते रोहिताञ्जिरनट्कपौ
९४
यवयारा तिरस्थान्यशाद्वावेकमपां ग्रहान्
९५
एतामुपदधात्येकम्
९६
अग्निरेकाक्षरेण च
क्षत्रस्योल्बं पुरा होतारोप्यस्य जगतश्चतुः
९७
स्याद्वत्समालभेतैव प्रतितिष्ठति यो वच
रुद्र इत्यब्रुवन्नाशुश्शिशापशोरवद्यणः
९८
तूष्णीमुपदधात्येकम्
९९
अपाञ्चौषधिनामपि
अग्नयेन्नवते क्रीते सोमे पदं सदाप च
लोकस्सरस्वत्यचैव अपान्त्वेमन् षडेव च
१००
अथाग्नये नीकवते प्वैन्द्रमेकादश द्वयम्
१०१
स्याद्वाचस्पतये एव भ्रातृव्यान्बद्धमव्सति
व्रतमेकैव भ्रातृव्यान्नुदते चतुरीरितः
१०२
महां इन्द्रो नृवदिषे त्वेतिबर्हिस्तथैव च ॥॥।
अपि चैव तमो मृत्युरप्यृचाक्रमणञ्चतुः

१०३
इद्ध्मे सन्नह्यग्निर्यावानेवाग्निस्तं द्विकं स्मृतम्
१०४
दीर्घं श्रवश्शतैस्सोमः क्रीतोप्यभि समेति च
एतं युवानमप्येव निर्वपेद्युक्ष्व हि
अथावदधिदेरुद्रावसवो दिशिमास आः
अग्नीषो मा विष्ट्वा देवा वै देवयजनन्त्वपि
स्याद्यज्ञे दक्षिणां मित्रावरुणौ श्रोणि वै तथा
शुक्रो यत्सप्तमे हैते चतुर्दश समा इह
१०५
विशे जनायापान्नप्त्रे जषः कर्णास्त्रयस्त्वपि
सौम्यास्त्रयः पिशंगाश्च सोमा भूयो भरेति च
घृतन्निष्पिबति त्रिभ्य स्वाहा द्विष्मो य इत्यपि
उभा हि वाँसुहवा निजाह वीमिनवस्मृताः
१०६
वायुर्व्यवात्प्रियं पाथो अग्निस्तेनैव यज्ञमु
एता वै देवता अद्भ्यस्वाहाक्षत्रमनुत्वपि
पदे अथो प्रजान्तस्य पितरोऽनुप्रसर्प च
क्रीतस्सोमस्तु देवा वै मृत्योः कूर्मो मधुस्महि
लोकेष्वधिमहां इन्द्रो वज्ररुद्रः खलु त्वपि
एष वा आप्त एवैष मित्राय च सहापि च
एवैताभिश्च एषा वै प्रजापतेरतीति च
विंशत्य एता देवा वै यज्ञस्य स्वेति च स्मृतः
१०७
महां इन्द्रो य ओ यज्ञं वा एतत्संभरद्वयम्
१०८

एष पतिर्विश्व ऋक्षावा एतद्वा अपामपि
अग्नेर्वै दीक्षया साद्ध्या वै देवास्सुवरित्यपि
चरुं यः कामयेदद्ध्यस्वाहेयं वै प्रजाः परा
देवा वै सत्रमासाग्नेस्त्रयो ज्यायां स चेद्दश
१०९
उतयद्यन्धदेवा वै यज्ञमाग्नीद्ध्र इत्यपि
प्रजामापो वच प्राणो वा एष द्वे च पञ्च च
११०
अथेदमस्मि तत्तेहं सुवर्यं रश्मिरित्यपि
अभिवा एष एषा वै देवानां विक्र इत्यपि
अग्निं वा एतदेवा वै प्रबाहु ग्रह सप्त च
१११
पृथकेकं प्रयुञ्जीयादपां गर्भं व्यदेति च
११२
इमे वै मद्ध्यसाद्ध्या वै देवाश्शुक्रास्त एव च
एषां वा एतदेवं वेद हन्त्याहुर्यषट् स्मृताः
११३
पशुरित्येष वा अग्नेर्यैतद्वाग्नेश्शिरस्त्रयः
११४
स्याद्यज्ञेष्वीड्य एकं स्यात्
११५
पशुर्वा एष यत्तथा
रुद्रो वा एष यद्वापि द्वावेव परिकीर्त्तितौ
११६
इयंगी स्यादियं वा वरथं सव्यं हि पूर्वम
एतद्वै छन्दसामन्या यन्ति व्रते तवेति षट्

११७
सजूरब्दो ध्रुवां वै रिपशोर्वा आलबेति च
स्यादेष वै विवस्वानादित्यश्चत्वारि चात्र वै
११८
एव तद्वादशेत्येतदेकमेव पृथक् भवेत्
११९
रूपं यदिष्टका एवैतामाशास्ते समिद्ध च
जातस्यात्तेजयज्ञो वै विष्णू ते मां कपञ्च च
१२०
उरुं हिरा जा वरुण ऐन्द्रो यत्पृश्निचद्वयम्
१२१
स्याद्देवा वै यदित्यत्र यज्ञेकुर्वत चात्र तु
उपांशा वक्ष्णयादाभ्ये अभ्यातानान्परेषु च
तथैवाग्रयणोर्द्ध्वे च पञ्चसंख्याः प्रकीर्त्तिताः
१२२
एकमेव च देवा वै यद्यज्ञेन न च स्मृतम्
युक्ष्वा हि ये तवे युष्टे ये पूर्वा द्वयमुच्यते
१२३
यज्ञं वा वसतदहं तस्मा एकं प्रकीर्त्तितम्
१२४
उत्सृज्यान्नोत्सृदेवा वैनचिनद्वौ प्रकीर्त्तितौ
१२५
याज्याजन्यभ्युदेति स्यान्मित्रोऽस्येतेन वारम
वीर्यै पशुषु चाक्येण वीर्यं वृङ्क्ते ध्रुवोऽसि च
अभ्यस्थाद्वीर्यकाम स्याद्वीर्यसम्मित इत्यपि
स्यात्त्रीणि च शतानी ---- ।

देवयानीश्च प्रथमो देवैनं संभरत्यपि
तथैव परमे व्योमन् तथां पशुपतिः पणः
णः = ५
१२६
मे वेहश्च चनस्सर्वदद्ध्यात्क्षोधुक एव च
ऋतजिच्च हिनोमीन्द्रा आयुर्दा अग्न इत्यथ
पृथिवी वेत्वधिस्यात्तु विशालो भवति व्यच
पृथिव्यैमापाहि चास्मिञ्चक्षुर्द्धत्तस्तथैव च
त्वा प्राणे सादयाम्यत्रा पह नीतपुरा कफौ
कफौ = १२
१२७
ऐतां वसव आग्नेयीं कृष्णग्रीवीश्च मे प्रभु
उन्नतं स्यादन्तरा च भवत्यङ्गार एव हि
त्वा प्राणञ्जिन्वयन्तेन्द्राग्निभ्यां त्वोपदधाति पृष्
तथा प्रतिचरत्याह द्यावा पृथिवि चेद्दश
१२८
अंहोमुचेप्वपक्रम्या तिष्ठन्मरुतमस्यपि
पृथिव्यास्समिधानं स्यादेनं संसृजतीति च
वैष्णवं देवयज्याया आर्त्तवा बिलधा बनः
पृषतो वैश्ववृश्चेद्य - दक्षा ँहोमुचं वृष
पुरोडाशात्करन्त्वस्मै य आसामलजस्तथा
अथ चाह समृद्ध्यै स्यात् षोडशैवात्र कीर्त्तिताः
१२९
वक्षि यक्षि च चेद्देववीतमश्च द्वयं भवेत्
१३०
अरेपसौ तनूपास्येववाजिनमपि त्रयः

१३१
स्यात्सीदवरुणो रख्षोहणो द्वे मुखतो ध च
कण्डूये तेन्द्रियं ब्रह्म गायत्रं ब्रह्मवर्चसम्
न ह्यत्यप्रस्त्रँसास्मै दानकामाः प्रजास्तथा
मूर्द्धन्वतीरनुम्लोचमादित्यास्त्वा कृणेव च
सावित्राणि जुहोतीति त्रयोदश समा स्मृताः
१३२
संहितासिप्रतिगृह्य संवत् भवयज त्रयः
१३३
अद्ध्वरेष्वसि सामाजिद्वयमेव समीरितम्
आद्यानुदात्तगणास्समाप्ताः

४ उदात्तादि ध्वनिनिरूपणव्याख्यानम्
नर्यापुयद्राष्ट्रभृतेजसा वृन्तागः कृतेषामभिदक्षिणो य
रुशद्दृशे चैव तु सौषधीरं तथैव चाश्मानतपोस्य यत्र १
सप्रत्नवन्येकगणास्तथास्यै देवास्तथा एकगणास्मृत स्यात्
वा आदिदैवी समगन्मतन्ते अन्वेतियस्त्वा निशिताय एका
२
इत्याह दिज्यैष्ठ्य तु विश्व एनं स्याद्रोहितो धूम्र च उत्तरं ब
वसोसनोयोविपयस्वयत्पृषत्सोमाय नासोमरथेनरक्षः ३
अथापि कृन्तामितथैव इन्द्राग्नीरोचसंयत्तहिरण्यपाणिम्
नवोनवश्चैव चतुष्कपालास्तेजस्कचैवं वसवस्त्वधूप ४
ज्योतिष्मतीन्त्वा तु नमो दुमूर्व्या समुब्जितो होत्राः
प्रयन्धिसेतुना
वात्तेग्न आयूंषि बृहस्पतिश्चन्नमो हिरैकं हि तु पूर्व आलभम्
५

बृहस्पतिस्त्वेकमथाष्टरात्र बृहस्पतिस्यात्खलु वै य ईयुः
केशैश्शिरो वेदमना यथा वै मनुष्य वाजा इति सेदुहोता ६
त्वष्टेदवैतिष्य तु आर्त्तिमार्च्छेत्तां स्येकवत्स्वां अहमेकमत्र
स्यात्त्रीणि वैकं तु तथैव ओजो वा एकमफ्सो न तु एकमेव
७
यदीतरश्चैव अपामतिन्दुसज्योतिषाभूवशरोवकावे
न प्राभवत्वे क्रतुमप्यथेयत्यथेयति ह्यन्वह मास एव ८
श्री ह्री मनुष्यस्य तु आनिषत्तस्सापा इयं सर्व च ताँहस्ते
तां वा व इन्वा उपवा वयः पसप्ताधिकाशीतिरुदात्तवर्गाः
९

५ अनुदात्तादि ध्वनिनिरूपणव्याख्यानम्
प्रजापतिस्ता वरुणं श्रितास्सहा हविष्मतीस्सूक्तमथैषतेगा
तथा मरुत्वं तमिडो यजत्युपामन्त्रांशुरंश्वायतनेशम स्यात्
१०
प्रजापतिश्चैव तथा प्रजास्सृजे प्राचीनवंशञ्च तथासुतासः
पूष्णोवनिष्ठुस्त्वपियन्त्यथोस्तामित्याह मृत्युर्गच वेधसश्च ११
सन्ना असन्नित्यथ लोकमेति स्यादेतयासञ्चमदग्निरेव
ऋतस्य रश्मिं त्वपिविश्वकर्माविद्यामसावादितु न व्यरो च
१२
यज्ञाय चैवापशवस्युराहेत्याहोपरीवह्यथ यज्ञमापत्
स्वाद्वीन्त्वचैवं पदपङ्क्तिरेव शंसत्यधात्रे पुच अग्निनादे १३
प्रजापतेराप्त्य च वीतये च एवैनमित्यत्र तु देवतेज्य
प्रजापतिर्वा वच विश्वरूपः पशुकामस्याद्यत ईश्वरो वा १४
देवामनुष्याः पितरर्द्ध्यवाङ् स्यात् पूषा प्रदेवावतु इन्द्रियं
वि

एवैनमाहर्त्ति ऋृतस्य गर्भश्च न प्रति स्यादथ वैदशभ्यः १५
अथैव यज्ञं दुह एषयज्ञ स्यान्वामहीदेवहृदेत्व चैव
यज्ञस्य सं इष्ट्य तथा च रूपेणैवावरुन्धेऽप्यथ आशिरञ्च १६
प्रयुज्य नव्याथ तथा चतुर्भ्यस्वाहा च अन्या देवतोर्ध्व
ऊषुणः
सेनाय पत्वन्यथ चेत्तृतीयात्पुरुस्म राज्याय समेव तत्र १७
अस्यूर्जमैन्द्रञ्चरुमेत एग्निर्देवेभ्य एवाथ गणाम एव
अथे यमे वस्नृषदेवडित्यपीकूर्माञ्छफैरच्छल मातरा च १८
अथो तसन्दृत्प्रज उक्त्थवाचीमग्निश्च वा एतकदाचन स्त
वृत्र्ाय वज्रं च तथैव हि प्राणैरेव आहोर्जहि सूयते वै १९
पश्चात् समीची च परोक्षपूर्णा पश्चाद्दिवस्पर्यथ एष वैदे
त्रिंशत्त्रयश्चाप्यथ चैव यज्ञो दक्षिणवशामालभभूत भव्यम्
२०
रयिञ्चितस्थायवयारतीश्चत्वपां ग्रहैतामुपदद्ध्यपि स्म
अथाग्निरेकाक्षरवत्समालभे तूष्णीमुपापाञ्च तु ओषधीनाम्
२१
तथाग्नये नीकवते पुरोडा तथैव वाचस्पतये पवस्व
महाँ इन्द्रो नृवदा च इद्ध्मे दीर्घं श्रवोदिस्म विशे जनाय
२२
वायुर्व्यवाञ्चैव महाँ इन्द्रो य ओजसा त्वेषपतिर्विचैव
अथोतयद्यन्त्विदमस्मिचेदपां गर्भं इमे वै पशुरित्यपि स्यात्
२३
यज्ञेषु ईड्यस्त्वथ चेत्पशुर्वा एषस्त्वियंगीश्च सजूर अब्दः
अथैव तद्वादशकेति पूर्वः पालोत्तरो यस्तु स एक एव २४
अथैव तद्वा दशकाथ रूपं यदिष्टकारात्र्युरुध् हि राजा
आदौ तु देवा इति वै पदं ततो यज्ञ इत्येतदकुर्व इत्यथ २५

तत्रैव यज्ञेन न इत्यतश्चेत् अकुर्वतेत्येतदिहात्र न स्यात्
युक्ष्वा हि येताप्यथ चेद्धियज्ञं वा वाथदेवा अध ऊर्ध्व वैन
२६
देवा वैनर्चीत्यर्थः
उत्सृज्य याज्या जनिदेवयानैर्मैवेहदैतां वसवस्तथा स्यात्
अंहोमुचे पूर्वथवख्षियक्षि त्वरेपसौ सीदवरुणच संहिता
२७
अथाद्ध्वरेषु स्म दृँहसेन्द्र त्वायाभवन्त्येकविँशतिंसा
२८
प्रोक्तं --- न्तथाजलेप्य यज्ञा--न्त स्नानं शारीरं तद्विधानतः
यद्विष्णोन्नामिधाधाभिः कीर्त्यते तत्तुजीवकम् २९
पूर्वंश अधीरकं कुर्यात्तदन्ते जीवकं चरेत्
जीवस्नानविहीनन्तच्छारीरं निष्फलं भवेत् ३०

इति द्ध्वनिनिरूपण व्याख्यानं

इति स्वरावधानम्

Reference:

Cātusvarāvadhāna Lakṣaṇam, Staats-Universitaets Bibliothek, Hamburg, Germany, Grantha script on palm leaves, 17 folios, Palm-leaf bundle III 8/133, pp. 211-244.